श्री राम रक्षा स्तोत्रं

श्री राम रक्षा स्तोत्रं

अस्य श्रीरामरक्षास्तोत्रमंत्रस्य बुधकौशिक ऋषिः श्रीसीतारामचंद्रो देवता अनुष्टुप् छंदः सीता शक्तिः श्रीमान् हनुमान् कीलकं श्रीरामचंद्रप्रीत्यर्थे रामरक्षास्तोत्रजपे विनियोगः ||

ध्यानं |
ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं
पीतं वासो वसानं नवकमलदळस्पर्धिनेत्रं प्रसन्नं |
वामांकारूढसीतामुखकमलमिलल्लोचनं नीरदाभं
नानालंकारदीप्तं दधतमुरुजटामंडलं रामचंद्रं ||

अथ स्तोत्रं |
चरितं रघुनाथस्य शतकोटिप्रविस्तरं |
एकैकमक्षरं पुंसां महापातकनाशनं || 1 ||

ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनं |
जानकीलक्ष्मणोपेतं जटामुकुटमंडितं || 2 ||

साऽसितूणधनुर्बाणपाणिं नक्तंचरांतकं |
स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुं || 3 ||

रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदां |
शिरो मे राघवः पातु फालं दशरथात्मजः || 4 ||

कौसल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती |
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः || 5 ||

जिह्वां विद्यानिधिः पातु कंठं भरतवंदितः |
स्कंधौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः || 6 ||

करौ सीतापतिः पातु हृदयं जामदग्न्यजित् |
मध्यं पातु खरध्वंसी नाभिं जांबवदाश्रयः || 7 ||

सुग्रीवेशः कटी पातु सक्थिनी हनुमत्प्रभुः |
ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत् || 8 ||

जानुनी सेतुकृत्पातु जंघे दशमुखांतकः |
पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः || 9 ||

एतां रामबलोपेतां रक्षां यः सुकृती पठेत् |
स चिरायुः सुखी पुत्री विजयी विनयी भवेत् || 10 ||

पातालभूतलव्योमचारिणश्छद्मचारिणः |
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः || 11 ||

रामेति रामभद्रेति रामचंद्रेति वा स्मरन् |
नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विंदति || 12 ||

जगज्जैत्रैकमंत्रेण रामनाम्नाभिरक्षितं |
यः कंठे धारयेत्तस्य करस्थाः सर्वसिद्धयः || 13 ||

वज्रपंजरनामेदं यो रामकवचं स्मरेत् |
अव्याहताज्ञः सर्वत्र लभते जयमंगळं || 14 ||

आदिष्टवान्यथा स्वप्ने रामरक्षामिमां हरः |
तथा लिखितवान्प्रातः प्रबुद्धो बुधकौशिकः || 15 ||

आरामः कल्पवृक्षाणां विरामः सकलापदां |
अभिरामस्त्रिलोकानां रामः श्रीमान् स नः प्रभुः || 16 ||

तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ |
पुंडरीक विशालाक्षौ चीरकृष्णाजिनांबरौ || 17 ||

फलमूलाशिनौ दांतौ तापसौ ब्रह्मचारिणौ |
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ || 18 ||

शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मतां |
रक्षः कुलनिहंतारौ त्रायेतां नो रघूत्तमौ || 19 ||

आत्तसज्यधनुषाविषुस्पृशावक्षयाशुगनिषंगसंगिनौ |
रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्छतां || 20 ||

सन्नद्धः कवची खड्गी चापबाणधरो युवा |
गच्छन्मनोरथान्नश्च रामः पातु सलक्ष्मणः || 21 ||

रामो दाशरथिः शूरो लक्ष्मणानुचरो बली |
काकुत्स्थः पुरुषः पूर्णः कौसल्येयो रघूत्तमः || 22 ||

वेदांतवेद्यो यज्ञेशः पुराणपुरुषोत्तमः |
जानकीवल्लभः श्रीमानप्रमेयपराक्रमः || 23 ||

इत्येतानि जपेन्नित्यं मद्भक्तः श्रद्धयान्वितः |
अश्वमेधाधिकं पुण्यं संप्राप्नोति न संशयः || 24 ||

रामं दूर्वादलश्यामं पद्माक्षं पीतवाससं |
स्तुवंति नामभिर्दिव्यैर्न ते संसारिणो नराः || 25 ||

रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुंदरं
काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकं |
राजेंद्रं सत्यसंधं दशरथतनयं श्यामलं शांतमूर्तिं
वंदे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिं || 26 ||

रामाय रामभद्राय रामचंद्राय वेधसे |
रघुनाथाय नाथाय सीतायाः पतये नमः || 27 ||

श्रीराम राम रघुनंदन राम राम
श्रीराम राम भरताग्रज राम राम |
श्रीराम राम रणकर्कश राम राम
श्रीराम राम शरणं भव राम राम || 28 ||

श्रीरामचंद्रचरणौ मनसा स्मरामि
श्रीरामचंद्रचरणौ वचसा गृणामि |
श्रीरामचंद्रचरणौ शिरसा नमामि
श्रीरामचंद्रचरणौ शरणं प्रपद्ये || 29 ||

माता रामो मत्पिता रामचंद्रः
स्वामी रामो मत्सखा रामचंद्रः |
सर्वस्वं मे रामचंद्रो दयाळुः
नान्यं जाने नैव जाने न जाने || 30 ||

दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मजा |
पुरतो मारुतिर्यस्य तं वंदे रघुनंदनं || 31 ||

लोकाभिरामं रणरंगधीरं
राजीवनेत्रं रघुवंशनाथं |
कारुण्यरूपं करुणाकरं तं
श्रीरामचंद्रं शरणं प्रपद्ये || 32 ||

मनोजवं मारुततुल्यवेगं
जितेंद्रियं बुद्धिमतां वरिष्ठं |
वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शरणं प्रपद्ये || 33 ||

कूजंतं रामरामेति मधुरं मधुराक्षरं |
आरुह्य कविताशाखां वंदे वाल्मीकिकोकिलं || 34 ||

आपदामपहर्तारं दातारं सर्वसंपदां |
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहं || 35 ||

भर्जनं भवबीजानामर्जनं सुखसंपदां |
तर्जनं यमदूतानां रामरामेति गर्जनं || 36 ||

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः |
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर || 37 ||

श्रीराम राम रामेति रमे रामे मनोरमे |
सहस्रनाम तत्तुल्यं रामनाम वरानने || 38 ||

इति श्रीबुधकौशिकमुनि विरचितं श्रीरामरक्षा स्तोत्रं |